२७८

मार्कण्डेय उवाच

अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥१॥
ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥२॥
नारदेन सहासीनं दृष्ट्वा सा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवन्दनम् ॥३॥

नारद उवाच

क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रे न चैनां सम्प्रयच्छसि ॥४॥

अश्वपतिरुवाच

कार्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
तदस्याः शृणु देवर्षे भर्तारं योऽनया वृतः ॥५॥

मार्कण्डेय उवाच

सा ब्रूहि विस्तरेणेति पित्रा सञ्चोदिता शुभा ।
दैवतस्येव वचनं प्रतिगृह्येदमब्रवीत् ॥६॥
आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥७॥
विनष्टचक्षुरस्तस्य बालपुत्रस्य धीमतः ।
सामाप्येन हृतं राज्यं छिद्रेऽस्मिन्पूर्ववैरिणा ॥८॥
स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यगतश्चापि तपस्तेपे महाव्रतः ॥९॥
तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ॥१०॥

नारद उवाच

अहो बत महत्पापं सावित्र्या नृपते कृतम् ।
अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥११॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥१२॥
बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान् ।
चित्रेऽपि च लिखत्यश्वांश्चित्राश्व इति चोच्यते ॥१३॥

राजोवाच

अपीदानीं स तेजस्वी बुद्धिमान्वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान्पितृनन्दनः ॥१४॥

नारद उवाच

विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव शूरश्च वसुधेव क्षमान्वितः ॥१५॥

अश्वपतिरुवाच

अपि राजात्मजो दाता ब्रह्मण्यो वापि सत्यवान् ।
रूपवानप्युदारो वाप्यथ वा प्रियदर्शनः ॥१६॥

नारद उवाच

साङ्कृते रन्तिदेवस्य स शक्त्या दानतः समः ।

ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥१७॥

ययातिरिव चोदारः सोमवत्प्रियदर्शनः ।

रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥१८॥

स दान्तः स मृदुः शूरः स सत्यः स जितेन्द्रियः ।

स मैत्रः सोऽनसूयश्च स ह्रीमान्धृतिमांश्च सः ॥१९॥

नित्यशश्चार्जवं तस्मिन्स्थितिस्तस्यैव च ध्रुवा ।

सम्क्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥२०॥

अश्वपतिरुवाच

गुणैरुपेतं सर्वैस्तं भगवन्प्रब्रवीषि मे ।

दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥२१॥

नारद उवाच

एको दोषोऽस्य नान्योऽस्ति सोऽद्यप्रभृति सत्यवान् ।

संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥२२॥

राजोवाच

एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।

तस्य दोषो महानेको गुणानाक्रम्य तिष्ठति ॥२३॥

यथा मे भगवानाह नारदो देवसत्कृतः ।

संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥२४॥

सावित्र्युवाच

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।

सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥२५॥

दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोऽपि वा ।

सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥२६॥

मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।

क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः ॥२७॥

नारद उवाच

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।

नैषा चालयितुं शक्या धर्मादस्मात्कथञ्चन ॥२८॥

नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः ।

प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥२९॥

राजोवाच

अविचार्यमेतदुक्तं हि तथ्यं भगवता वचः ।

करिष्याम्येतदेवं च गुरुर्हि भगवान्मम ॥३०॥

नारद उवाच

अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव ।

साधयिष्यामहे तावत्सर्वेषां भद्रमस्तु वः ॥३१॥

मार्कण्डेय उवाच

एवमुक्त्वा खमुत्पत्य नारदस्त्रिदिवं गतः ।

राजापि दुहितुः सर्वं वैवाहिकमकारयत् ॥३२॥